2019

1. विंशतिकाविज्ञप्तिमात्रतासिद्धिग्रन्थः कस्य सौगतप्रस्थानस्य पोषकः ?

Ans. विज्ञानवादप्रस्थानस्य पोषकः।

2. विंशतिकोपरि स्वोपज्ञवृत्तिः विद्यते न वा ?

Ans. विद्यते।

3. स्थिरमतिः कः?

Ans. त्रिंशिकाप्रकरणस्य भाष्यकारः।

4. विज्ञप्तिमात्रतासिद्धिः इत्यत्र विज्ञप्तिः इत्यस्य पदस्य कोऽर्थः?

Ans. विज्ञप्तिः इत्यस्य पदस्यार्थः – चित्तं विज्ञानं मनस् ।

5. योगाचारमते आत्मा स्वीक्रियते न वा?

Ans. न स्वीक्रियते ।

6. कति सौगतदर्शनसम्प्रदायाः? के च ते ?

Ans. चत्वाराः सौगतदर्शनसम्प्रदायाः – वैभाषिक-सौत्रान्तिक-माध्यमिक-योगाचारश्च ।

7. द्वे आवरणे के ?

Ans. 1- क्लेशावरणम् 2- ज्ञेयावरणम्।

8. योगाचारदर्शनस्य प्रवर्तकाचार्यः कः ?

Ans. आचार्यः असंगः ।

9. ‘आगमानुयायिविज्ञानवादिनां मते अष्टौ विज्ञानानि सन्ति’ कथनमिदं सत्यम् असत्यं वा ?

Ans. कथनमिदं सत्यम् ।

10. मनसो नामपर्यायान् लिखत।

Ans. चित्तं विज्ञानं विज्ञप्तिश्च ।

11. विज्ञानवादिमते परमाणोः सत्ता विद्यते न वा ?

Ans. न विद्यते ।

12. सत्यद्वयं लिखत।

Ans. 1- संवृत्तिसत्यम् 2- परमार्थसत्यम् ।

13. कस्य असत्केशचन्द्रादिदर्शनम् ?

Ans. तैमिरिकस्य

14. विज्ञानवादिमते नरकपालाः दुःखं प्रत्यनुभवन्ति न वा ?

Ans. न प्रत्यनुभवन्ति ।

15. कति स्कन्धाः ? के च ते ?

Ans. पञ्चस्कन्धाः –रूपवेदनासंज्ञासंस्कारविज्ञानञ्च ।

16. योगाचारमते देशकालनियमः सम्भवति, न वा?

Ans. सम्भवति।

17. षट्केन युगपद्योगात् कस्य सिद्धिः भवति ?

Ans. परमाणूनां षडंषता सिद्यति ।

18. बुद्धगोचरः कः ?

Ans. स्वचित्तज्ञानं परचित्तज्ञानं च बुद्धगोचरः ।

19. स्वर्गे तिर्यञ्चः विज्ञप्तिमात्रतादिशा सम्भवन्ति, न वा ?

Ans. सम्भवन्ति ।

20. ग्रहाग्रहौ युगपत् भवतः न वा ?

Ans. न भवतः।

2015

21. विज्ञप्तिमात्रतासिद्धिग्रन्थकारस्य जन्मकालं लिखत।

Ans. 420 ई. तः 500 ई. मध्ये ।

22. विज्ञप्तिमात्रतासिद्धिः इत्यत्र 'मात्रता' प्रयोगस्य किमुद्देश्यम् ?

Ans. बाह्यार्थप्रतिषेधार्थम् ।

23. आचार्यवसुबन्धोः प्रसिद्धस्य ग्रन्थद्वयस्य नामोल्लोखं कुरुत।

Ans. 1-विज्ञप्तिमात्रतासिद्धिः 2- अभिधर्मकोषः

24. विज्ञप्तिमात्रतासिद्धेः प्रवृत्तिनिमित्तं किम् ?

Ans. त्रैधातुकम् विज्ञप्तिमात्रम् व्यवस्थाप्यते।

25. स्वर्गनरकादिषु सत्त्वानामुत्पत्तेः किं कारणम् ? ग्रन्थदिशा सूचयत।

Ans. सत्त्वाः स्वकर्मभिः स्वर्गनरकादिषु उत्पद्यन्ते ।

26. विज्ञप्तिमात्रता बुद्धगोचरा पृथग्जनगोचरा वा ? सूचयत।

Ans. बुद्धगोचरा ।

27. कृत्यक्रिया का ?

Ans. यदि ज्ञानस्य कृते बाह्यार्थस्य अपेक्षा नास्ति ज्ञानमेव च बाह्यार्थरूपे अवभासितम् , तर्हि संसारे याः याः कृत्यक्रियाः भवन्ति ताः सर्वाः अवभासितमात्रं स्युः ।

28. मिद्धः कः ?

Ans. मिद्धम् अस्वतन्त्रवृत्तिचेतसोऽभिसंक्षेपः ।

29. महावद्यः कः ? मनोदण्डो अवद्य भवति न वा ?

Ans. महावद्यः मनोदण्डः। मनोदण्डो अवद्य न भवति ।

30. 'देशादिनियमः' इत्यत्र 'आदि' पदेन किं सूच्यते ?

Ans. 'आदि' पदेन काल-सन्तान-कृत्यक्रियानियमाः सूच्यन्ते ।

31. आयतनानि कति ? नामानि लिखत।

Ans. द्वादशायतनानि । चक्षुरायतनम् रूपायतनम् श्रोतायतनम् शब्दायतनम् घ्राणायतनम् गन्धायतनम् जिह्वाऽऽयतनम् रसायतनम् कायायतनम् स्पर्शायतनम् मन आयतनम् धर्मायतनम् च ।

32. क्लेशावरणं किम् ?

Ans. क्लेशा हि मोक्षप्राप्तेरावरणमिति ।

33. धर्मनैरात्म्यम् किम् ?

Ans. घटपटादयः ये बाह्यपदार्थाः सन्ति ते सर्वे विज्ञानस्य प्रतिभासमात्रम्। बाह्यपदार्थाणां स्वास्तित्त्वं नास्ति । इति धर्मनैरात्म्यस्य अभिप्रायः ।

34. विज्ञानवादिनः परमाणोः सत्तां स्वीकुर्वन्ति न वा? कथम् ?

Ans. न स्वीकुर्वन्ति ।

35. विज्ञप्तिमात्रतासिद्धिः कस्य विज्ञानवादिसम्प्रदायस्य ग्रन्थः ?

Ans. आगमानुयायिविज्ञानवादिसम्प्रदायस्य ।

36. 'परविज्ञप्ति' इत्यस्य किं तात्पर्यम् ?

Ans. मरणादि विक्रियायाः उत्पत्तौ या विज्ञप्तिः आधिपत्यरूपे भवति सा परविज्ञप्तिः ।

37. विज्ञप्तिमात्रतावादिनः प्रत्यक्षप्रमाणस्य परमार्थतो अस्तित्वं स्वीकुर्वन्ति न वा ? कथम्?

Ans. न स्वीकुर्वन्ति। प्रत्यक्षबुद्धिः स्वप्नादौ यथा........।

38. विज्ञप्तिमात्रतासिद्धिः कति भागे उपनिबद्धा जाता ? तेषां नामानि लिखत।

Ans. द्वे भागे। विंशतिकात्रिंशिका च।

39. तैमिरिकैः किमनुभूयते ?

Ans. तैमिरिकैः असत्केशादि अनुभूयते।

40. मृत्युः किमति ?/ मरणं किम् ? ग्रन्थदिशा लिखत।

Ans. मरणं परविज्ञप्तिविशेषाद् विक्रिया यथा....।

2016

41. विज्ञप्तिमात्रतासिद्धिप्रकरणं कस्य बौद्धदर्शनसम्प्रदायस्य ग्रन्थः ?

Ans. योगाचारदर्शनस्य।

42. स्थिरमतिभाष्यं विंशतिकोपरि विद्यते त्रिंशिकोपरि वा ?

Ans. त्रिंशिकोपरि।

43. नैरात्म्यद्वयं किम् ?

Ans. पुद्गलनैरात्म्यधर्मनैरात्म्यञ्च।

44. विज्ञप्तिमात्रतासिद्धिः इत्यत्र 'मात्रता' इत्यस्य पदस्य कोऽर्थः ?

Ans. बाह्यार्थप्रतिषेधार्थम्।

45. द्वे आवरणे के ?

Ans. क्लेशावरणं ज्ञेयावरणम् च।

46. विज्ञानवादिनां सम्प्रदायद्वयं किम् ?

Ans. युक्त्यनुयायिविज्ञानवादः, आगमानुयायिविज्ञानवादः

47. विज्ञप्तिमात्रतासिद्धिग्रन्थस्य रचनाकारः कः ?

Ans. आचार्य वसुबन्धुः।

48. विंशतिकाविज्ञप्तिमात्रतायां कति कारिकाः सन्ति ?

Ans. द्वाविंशति (22) कारिकाः।

49. युक्त्यनुयायिविज्ञानवादिनः कति विज्ञानानि स्वीकुर्वन्ति ?

Ans. षड् (6) विज्ञानानि।

50. द्वितीयधर्मचक्रप्रवर्तनं विज्ञानवादिमते नेयार्थदेशना नीतार्थदेशना वा ?

Ans. विज्ञानवादिमते नेयार्थदेशना।

51. विज्ञानवादस्य नामापरं किम् ?

Ans. योगाचारः।

52. कति पिटकानि ? कानि च तानि ?

Ans. त्रिपिटकानि। सुत्तपिटकं विनयपिटकं अभिधम्मपिटकं।

53. योगाचारदर्शनस्य कः प्रवर्तकः ?

Ans. आचार्य असंगः।

54. विज्ञानवादिनः स्वसंवेदनं स्वीकुर्वन्ति न वा ?

Ans. स्वीकुर्वन्ति।

55. विज्ञानस्य नामपर्यायान् लिखत।

Ans. चित्तं मनो विज्ञानं विज्ञप्तिश्चेति।

56. विज्ञानवादिमते प्रेताः नारकं दुःखम् अनुभवन्ति न वा ?

Ans. न अनुभवन्ति ।

57. षट्केन युगपद्योगात् कस्य सिद्धिः भवति ?

Ans. परमणोः षडंशता सिध्यति ।

58. विज्ञानवादिनः बाह्यार्थं स्वीकुर्वन्ति, न वा ?

Ans. न स्वीकुर्वन्ति ।

59. कति सौगतदर्शनप्रस्थानानि ? कानि च तानि?

Ans. चत्वाराः सौगतदर्शनसम्प्रदायाः – वैभाषिक-सौत्रान्तिक-माध्यमिक-योगाचारश्च ।

60. आगमानुयायिविज्ञानवादिनः कति विज्ञानानि स्वीकुर्वन्ति ?

Ans. आगमानुयायिविज्ञानवादिनः अष्टौ (8) विज्ञानानि स्वीकुर्वन्ति ।

2014

61. विज्ञप्तिमात्रतासिद्धेः ग्रन्थकारः कः ?

Ans. आचार्य वसुबन्धुः ।

62. ‘विज्ञप्ति’ पदस्य अपरपर्यायाः के ?

Ans. चित्तं मनो विज्ञानं विज्ञप्तिश्चेति ।

63. विज्ञप्तिमात्रतासिद्धेः विंशतिकायां कति कारिकाः सन्ति ?

Ans. द्वाविंशति (22) कारिकाः ।

64. वसुबन्धो जन्मस्थानं लिखत।

Ans. गान्धारप्रदेशस्य पुरुषपुरनगरे ।

65. ‘तिरश्चां’ इत्यस्याशयं लिखत।

Ans. पशुपक्षयः।

66. विज्ञप्तिमात्रता चिन्त्या अचिन्त्या वा? ग्रन्थदिशा लिखत।

Ans. अचिन्त्या

67. स्मरणं किम्?

Ans. स्मृतिः (स्मरणं) संस्तुते वस्तुन्यसम्प्रमोषश्चेतसोऽभिलपनता ।

68. मिद्धः कः?

Ans. मिद्धम् अस्वतन्त्रवृत्तिचेतसोऽभिसंक्षेपः ।

69. रूपं कतिविधम् ?

Ans. रूपं द्विधा । विंशतिधा ।

70. ‘मनोदण्डः महावद्यः’ इत्यस्य तात्पर्यं लिखत।

Ans. मनःप्रदोषमात्रेण सत्वानां मरणमेव मनोदण्डः महावद्यः ।

71. परचित्तविदां ज्ञानं यथार्थम् अयथार्थं वा ? ग्रन्थदिशा लिखत।

Ans. अयथार्थम् ।

72. नरकपालादिदर्शनं स्वर्गे संभवन्ति न वा ?

Ans. संभवन्ति

73. देशादिनियमः कः ?

Ans. देशनियमः कालनियमः सन्तानानियमः कृत्यक्रियानियमश्च ।

74. कृत्यक्रिया का ?

Ans. यदि ज्ञानस्य कृते बाह्यार्थस्य अपेक्षा नास्ति ज्ञानमेव च बाह्यार्थरूपे अवभासितम् , तर्हि संसारे याः याः कृत्यक्रियाः भवन्ति ताः सर्वाः अवभासितमात्रं स्युः ।

75. नरके प्रेतानामस्तित्त्वस्य कारणं किम् ?

Ans. नरके प्रेतानामस्तित्त्वमेव नास्ति ।

76. आयतनं कति विधम् ? नामानि लिखत ।

Ans. द्वादशायतनानि । चक्षुरायतनम् रूपायतनम् श्रोतायतनम् शब्दायतनम् घ्राणायतनम् गन्धायतनम् जिह्वाऽऽयतनम् रसायतनम् कायायतनम् स्पर्शायतनम् मन आयतनम् धर्मायतनम् च ।

77. परमाणोः षडंशतया किं सिध्यति ? ग्रन्थदिशा सूचयत।

Ans. षड्भ्यो दिग्भ्यः षड्भिः परमाणुभिर्युगपद्योगः स्याद् इति सिध्यति ।

78. नैरात्म्यं किम् ? अस्य भेदान् लिखत।

Ans. पुद्गलनैरात्म्यधर्मनैरात्म्यञ्च

79. आवरणं किम् ? अस्य भेदान् लिखत।

Ans.क्लेशावरणंज्ञेयावरणञ्च ।